International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2025; 2(5): 127-131
© 2025 IJMH
www.themultijournal.com
Received: 11-10-2025
Accepted: 25-10-2025
Publish : 28-10-2025

**डॉ.शकुन्तलादाशः**
अतिथि-अध्यापिका,
(सहायकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ.शकुन्तलादाशः**
अतिथि-अध्यापिका,
(सहायकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# स्मार्तधर्मपरम्परायां निमित्तधर्मस्य समासेनाध्ययनम्

**डॉ.शकुन्तलादाशः**

**शोधसारः (Abstract)**

अस्मिन् शोधलेखे भारतीयधर्मपरम्परायाः केन्द्रीयतत्त्वभूतस्य धर्मस्य तात्त्विकं शास्त्रीयं च स्वरूपं निरूप्यते। चतुर्षु पुरुषार्थेषु प्रथमपुरुषार्थरूपेण प्रतिष्ठितो धर्मः सामान्यतः श्रौतधर्मः तथा स्मार्तधर्मः इति द्विधा विभज्यते। श्रौतधर्मस्य वैदिककर्मात्मकस्वरूपं, यागयज्ञादिकर्मणां तथा उपनिषद्विहित-विद्यानां च प्रवृत्तिनिवृत्तिभेदेन विवेचनं कृतम्। मनुस्मृत्यादिशास्त्रवचनेषु प्रतिपादितं प्रवृत्तिधर्मनिवृत्तिधर्मयोः भेदाधारेण धर्मस्य सांसारिकाभ्युदयहेतुत्वं तथा नैःश्रेयसप्राप्तिहेतुत्वं च स्पष्टीकृतम्। तत्पश्चात् स्मृतिशास्त्रेषु प्रतिपादितस्य वर्णाश्रमव्यवस्थाया ऐतिहासिकविकासः, मनु– याज्ञवल्क्य– गौतम– वसिष्ठ– आपस्तम्बादीनां मतानां तुलनात्मकमध्ययनं च कृतम्। विशेषतः विज्ञानेश्वराचार्येण मिताक्षराटीकायां प्रतिपादिताः षड्विधाः स्मार्तधर्माः—वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च—सविस्तरं विवेचिताः। एतेषु धर्मेषु निमित्तधर्मरूपेण प्रायश्चित्तस्य स्थानं, तस्य पापशोधनात्मकं सामाजिकोपयोगित्वं च विशदीकृतम्। अयं शोधः धर्मस्य वैदिकस्मार्तपरम्परायां समन्वितं सैद्धान्तिकं तथा व्यावहारिकं स्वरूपं प्रकाशयति।

**Key Words (मुख्यशब्दाः)**

धर्मः, पुरुषार्थाः, श्रौतधर्मः, स्मार्तधर्मः, प्रवृत्तिधर्मः, निवृत्तिधर्मः, वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मः, प्रायश्चित्तम्, विज्ञानेश्वरः

**उपक्रमः**

भारतीयसंस्कृतेः नैतिक-आध्यात्मिकव्यवस्थायां धर्मः मूलस्तम्भरूपेण प्रतिष्ठितः। चतुर्षु पुरुषार्थेषु धर्मः न केवलं प्रथमः, अपि तु अर्थकाममोक्षाणां नियामकः अपि वर्तते। वेदाः धर्मस्य परमप्रमाणत्वेन स्वीक्रियन्ते, तेषु श्रौतधर्मरूपेण वैदिककर्मणां विधिः उपदिष्टः। कालान्तरं स्मृतिधर्मशास्त्रेषु धर्मस्य सामाजिक-व्यावहारिकस्वरूपं विकसितं दृश्यते, यत्र वर्णाश्रमव्यवस्था, आचार-व्यवहार-प्रायश्चित्तादयः सुस्पष्टतया निरूपिताः।

मन्वादिस्मृतिकारेभिः धर्मस्य कर्तव्याकर्तव्यविभागः कृतः, याज्ञवल्क्यादिभिः तस्य सूक्ष्मभेदाः विवेचिताः, तथा विज्ञानेश्वराचार्येण धर्मशब्दस्य व्यापकव्याख्या कृत्वा षड्विधस्मार्तधर्मव्यवस्था प्रतिपादिता। विशेषतः विहिताकरण-प्रतिषिद्धसेवननिमित्तं प्रायश्चित्तं यत् निमित्तधर्मरूपेण निर्दिष्टं, तस्य पापशोधनात्मकं तथा समाजसंरक्षणात्मकं महत्त्वं धर्मशास्त्रेषु प्रतिपादितम्।

अतः अस्य अध्ययनस्य उद्देश्यं वर्तते—श्रौतस्मार्तपरम्परायां धर्मस्य तात्त्विकविकासं, वर्णाश्रम-व्यवस्थां, तथा षड्विधस्मार्तधर्मेषु विशेषतः निमित्तधर्मस्य (प्रायश्चित्तस्य) योगदानं सम्यग्विवेचयितुम्।

**विषयविन्यासः-**

चतुर्षु पुरुषार्थेषु प्रथमपुरुषार्थो धर्मः सामान्येन द्विविधः। श्रौतधर्मः स्मार्त्तधर्मश्च । श्रौतधर्मत्वेनात्र वैदिकं कर्म ज्योतिष्टोमादिकं प्रतीकोपासनादिकं च गृह्यते। एतदेव श्रौतधर्म वैदिकधर्मपदवाच्यः। वैदिकधर्मपदेन वैदिककर्मानुष्ठानानि यागयज्ञादीनि तथा उपनिष-द्विद्यादीनि शाण्डल्यविद्यादीनि च विधीयन्ते। एतयो: स्वर्गादिसुख-प्राप्तिसंसार- प्रवृत्तिहेतुत्वात् प्रवृत्त्याख्यं वैदिकं कर्म, तथा नि:श्रेयसं

मोक्षस्तदर्थं कर्म नैःश्रेसयिकं संसारनिवृत्तिहेतुत्वान्निवृत्त्या-ख्यमित्येवं वैदिकं कर्म द्विप्रकारकं वेदितव्यम्। यथाह मनुः-

**सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च।**
**प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्।**
**इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।**
**निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते।**[१]

इमौ द्वौ प्रवृत्तिनिवृत्तिधर्मौ वेदेषु प्रतिपादितौ वर्तेते। अत्र निवृत्ति-विचार-स्यावकाशाभावात् प्रवृत्तिविचारस्यावश्यकत्वात् तस्यैव श्रेणीविभागः समुद्दिष्टः।

धर्मशास्त्रेषु मन्वादिभिः प्रतिविभागं कर्त्तव्याकर्त्तव्यमभिहितम्। मनुस्मृतेः इदमेवैतिहासिकं तत्त्वं लभ्यते यत् वर्णविभागः स्मृतेः पूर्वमासीत्। आश्रमविभागो यदि वाऽऽसीदित्यस्य व्यवस्थितं रूपं तथा नासीत् यद्रूपं क्रमेण स्मृतौ उपलब्धम्। अतः मनुः आश्रमव्यवस्थायां तदधीनधर्मान् व्यवस्थापयामस। याज्ञवल्क्यो यदि वा गौतम-वसिष्ठ-आपस्तम्ब-व्यास-प्रभृतिस्मृतिकारेभ्योऽर्वाचीनस्तथापि तस्य समये वर्णाश्रमधर्मव्यवस्थया सह इतरेषां केषाञ्चनधर्माणामव्यवस्था संघटिताऽभूत्। वसिष्ठः स्फुटं चतुर्णामाश्रमाणां परिगणनं कृतवान्। प्रथमतो मनुः धर्मव्यवस्थां कृतवान्। पुनश्च कुलपरम्परया च केषाञ्चन धर्माणां स्थितिः लभ्यते। मनसि अयमेव प्रश्नः समुदेति यद्यदि आचरितानां धर्मकार्याणामनुष्ठानेन वेदेन सह विरोधो न भवति तर्हि स एव धर्म पदवाच्यो भवति। एवं प्रकारेण तद्वचनं गृहीत्वा वेदाविरुद्धदेशजातिकुलाचाराणां धर्म प्रामाणिकोऽस्त्येवेति। पुनश्च वर्णधर्मत्वेनाश्रमधर्मत्वेन च धर्माणां मुख्यतया विभागसत्वादपि प्रतिवर्णं प्रत्याश्रमं च धर्मभेदः परिलक्ष्यते। तेषां विशेषरूपं याज्ञवल्क्यादिमुनिभिः जिज्ञासितमस्ति। ततोऽर्वाचीनविज्ञानेश्वरा-चार्येण वर्णधर्मत्वेन,वर्णाश्रम-धर्मत्वेन, गुणधर्मत्वेन, निमित्तधर्मत्वेन, साधारणधर्मत्वेन च धर्मशब्दः षड्स्मार्तधर्मेण विभक्तो विहितः।

अत्र वर्णधर्मस्तु ब्रह्मणो नित्यं मद्यं वर्जयेदिति। आश्रमधर्मः- पालाशो दण्डो ब्रह्मणस्येत्येवमादिः। गुणधर्मः - शास्त्रीयाभिषेका-दिगुणयुक्तस्य राज्ञः प्रजापालनादिः। निमित्तधर्मो – विहिताकरण-प्रतिषिद्धसेवननिमित्तं प्राय-श्चित्तम्। साधारणधर्मः - अहिंसादिः। मा हिंस्यात्सर्वभूतानि इत्याचाण्डालं साधारणो धर्मः। गौतमधर्मसूत्रस्य मिताक्षराटीकाकारेण श्रीमता हतदत्तेनाऽपि तृतीयप्रश्ने पञ्चविधो धर्मः प्रतिपादितः - वर्णधर्मः, आश्रम-धर्मः, उभयधर्मो,गुणधर्मो नैमित्तिकधर्मश्चेति। तत्र वर्णप्रयुक्तो धर्मो वर्णधर्म उपनयनं ब्रह्मणस्याष्टम इति। आश्रमप्रयुक्त आश्रमधर्मो ब्रह्मचर्यादेः समिदाधानादिरिति। उभयप्रयुक्त उभयधर्मो ब्रह्मणस्य ब्रह्मचारिणः पालाशो दण्ड इत्यादिः। अभिषेकगुणप्रयुक्तस्य प्रजापालना-दिगुणधर्मः। ब्रह्महत्यादौ निमित्ते कर्त्तव्यो नैमित्तिको धर्मः प्रायश्चित्तम्।

मनुस्मृतेः मन्वर्थमुक्तावलीटीकाकारेण श्रीमता कुल्लूकभट्टेन -

**एषा धर्मस्य वो योनिः समासेन प्रकीर्त्तिता।**
**सम्भवश्चास्य सर्वस्य वर्णधर्मान्निबोधत।।**[२]

इत्यस्य व्याख्याप्रसङ्गे उक्तं यत् - गोविन्दराजस्त्विह धर्मशब्दोऽपूर्वा-ख्यात्मकधर्मे वर्तते इति "विद्वद्भिः सेवितः"[३] इत्यत्र तत्कारणेऽष्टकादौ वाऽपूर्वाख्यस्य धर्मस्य योनिरिरिति व्याख्यातवान्। सम्भवश्चोत्तपत्तिर्ज- गत उक्ता।वर्णधर्मशब्दश्च वर्णधर्माश्रमधर्मवर्णाश्रमधर्मगुणधर्मनैमित्ति-कधर्माणा-मुपलक्षकः ते च भविषयपुराणोक्ताः।

**वर्णधर्मः स्मृतस्त्वेको आश्रमाणामतः परम्।**
**वर्णाश्रमस्तृतीयस्तु गौणे नैमित्तिकस्तथा।।**
**वर्णत्वमेकमाश्रित्य यो धर्मः संप्रवर्तते।**
**वर्णधर्मः (स) उक्तस्तु यथोपनयनं नृप।।**
**यस्त्वाश्रमं समाश्रित्य अधिकारः प्रवर्तते।**
**स सर्वाश्रमधर्मस्तु भिक्षा दण्डादिको यथा।।**
**वर्णत्वमाश्रमत्वञ्च योऽधिकृत्य प्रवर्तते।**
**स वर्णाश्रमधर्मस्तु मौञ्जीया मेखला यथा।।**
**यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते।**
**यथा मूर्धाभिसिक्तस्य प्रजानां परिपालनम्।।**
**निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्तते।**
**नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा।। इति।** [४]

पण्डितप्रवराचार्यश्रीकुलमणिमिश्रमहामहोपाध्यायोपाधिविभूषितश्रीचरणास्तु -

**चत्वारि शृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे सप्त हस्तातो अस्य।।**
**त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्या आविवेश।।** [५]

इत्यस्य वेदवचनस्य व्याख्यानावसरे धर्मवृषभस्य सप्तहस्ताः सन्ति। यथा - वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमत्तधर्मः, साधारणधर्मः, परमधर्मश्चेत्युक्तम्। पुनश्च मनुस्मृतौ उल्लिखितमस्ति यत्-

**सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं समस्युतिः।**
**मुखबाहुरूपज्जानां पृथक्कर्माण्यकल्पयत्।।** [६]

स ब्रह्म महातेजा अस्य समग्रस्य रक्षार्थं मुखादिजवितानां ब्रह्मणादीनां विभागेन कर्माणि दृष्टादृष्टार्थानि निर्मितवान्।

विज्ञानयोगिना श्रीमता विज्ञानेश्वरेण योगीश्वरयाज्ञवल्क्यकृतस्मृतेः[७] प्रथमश्लोकस्य व्याख्यानावसरे "धर्म" पदेन षड्विधस्मार्त्तधर्माणा-मुल्लेखः कृतः। अत्र सामान्येन विज्ञानेश्वरोक्तषड्विधस्मार्तधर्माः प्रतपाद्यन्ते। ते यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति। क्रमशस्तेषां विवेचनं क्रियते। तत्रादौ वर्णधर्मः।

**वर्णधर्मः -**

वर्णाश्चत्वारः। ब्रह्मणक्षत्रियवैश्यशूद्राः। तेषां वर्णानां यः प्रतिस्विकः धर्मः स एवात्र वर्णधर्म इति कथ्यते। तत्र ब्रह्मणे नित्यं मद्यं वर्जयेत् ।

स च यजनयाजनऽध्ययनाध्यापन - दान - प्रतिग्रहान् कुर्यात्। तेषु धर्मार्थं यजनमध्ययनं दानञ्च। जीविकार्थं याजनमध्यापनं प्रतिग्रहश्चेति । यथोक्तं मनुना -

**अध्यापनमध्ययनं यजनं याजनं तथा।**
**दानं प्रतिग्रहश्चेति ब्रह्मणानामकल्पयत् ।।**[८] इति ।

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः। यः कश्चन क्षत्रियो राजा भवितुं नार्हति । क्षत्रियो धर्मार्थं यजनमध्ययनं दानञ्च कुर्यात्। किन्तु युद्धार्जितेन धनेन जीविकां निर्वाहयेत्। प्रसङ्गेऽ-स्मिन्नुक्तं मनुना -

**प्रजानां रक्षणं दानमिज्याध्ययनमेव च।**
**विषयेष्वसक्तिश्च क्षत्रियस्य समासतः।।**[९] इति ।

तद्वद् वैश्योऽपि धर्मार्थं यजनमध्ययनं दानञ्च कुर्यात्। किन्तु कृषि-पशुपालनवाणिज्यादिना जीविकानिर्वाहं कुर्यात्। प्रसङ्गेऽस्मि-न्नुक्तं मनुना-

**पशूनां रक्षणं दानमिज्याध्ययनमेव च ।**
**वणिक्पथं कुसीदञ्च वैश्यस्य कृषिकर्म च ।।**[१०]इति ।

शूद्रस्य त्वितरवर्णानां सेवैव परमोधर्मः, सैव च जीविकेति मनुना प्रतिपातितम् । तद्यथा-

**एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् ।**
**एशतेषामेव वर्णानां शुश्रूषामनसूयया ।।**[११] इति ।

अनेन प्रकारेण यस्य वर्णस्य यो धर्मः प्रतिपादितः स वर्णः तेनैव धर्मेण जीवेत्। यदि तेन धर्मेण कथमपि जीवितुं न शक्नोति, तर्हि तत्परवर्त्तिधर्मेण

जीवेत् । अयमापद्धर्म इति कथ्यते । अर्थाद् ब्रह्मणः स्ववृत्त्या जीवितुमसमर्थः क्षत्रियस्य वृत्त्या तयाऽसमर्थः वैश्यस्य वृत्त्या जीवितुं चेष्टेत, न तु कदाचित् शूद्रवृत्त्येति। एवञ्च क्षत्रियोऽपि स्ववृत्त्या जीवितुमसमर्थः वैश्यस्य वृत्त्या जीवेत् न शूद्रवृत्त्या। वैश्यस्तु स्ववृत्त्या जीवितुमसमर्थः शूद्रवृत्त्या जीविका - निर्वाहं कुर्यात् । परन्तु गतायामापदि सर्वे वर्णा प्रायश्चित्तं कृत्वा स्वस्वधर्मे पुनः निवेशेयुः, अन्यथा येन धर्मेण जीवन्ति तद्धर्मत्वं प्राप्नुयुः । यथोक्तं याज्ञवल्क्येन -

**क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ।**
**निस्तीर्य्य तामथात्मानं पावयित्वा न्यसेत्पथि ।।**[१२] इति ।।

पुनश्च वैश्यवृत्त्या जीवतो ब्रह्मणस्य कानिचिदपण्यानि भवन्ति। अर्थादापदि स तानि द्रव्याणि न विक्रीणीत। प्रसङ्गेऽस्मिन्नुक्तं[१३] याज्ञ-वल्क्येन यत् -

**फलोपलक्षौमसोममनुष्यापूपविरुधः ।**
**तिलौदनरसक्षारान् दधि क्षीरं घृतं जलम् ।**
**शस्त्रासवमधूच्छिष्टं मधु लाक्षा च बर्हिषः ।**
**मृच्चर्म-पुष्प - कुतप - केश - तक्रविषक्षितिः ।**
**कौशेय - नील - लवण - मांसैकशफसीसकान् ।।**
**शाकाद्रौषधि - पिण्याक - पशुगन्धांस्तथैव च ।**
**वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन ।** इति ।।

**आश्रमधर्मः -**

आश्रमाश्चत्वारः। ब्रह्मचर्याश्रमः, गार्हस्थ्यश्रमः, वानप्रस्थाश्रमः, सन्न्यासाश्रमश्चेति। शतायुर्वै पुरुष इति श्रुतिप्रमाणानुसारेण पुरुषस्य वैदिकमायुः चतुर्धा विभज्य चत्वार आश्रमाः कल्पिताः। तत्रायुषः प्रथमभागे ब्रह्मचारी, द्वितीयभागे गृहस्थः, तृतीयभागे वानप्रस्थः, चतुर्थभागे च जनः सन्न्यासी भवति। अतः प्रत्याश्रमं पञ्चविंशति-वर्षाणि परिकल्पितानि । अतो मानवः पञ्चविंशतिवर्षाणि यावद् ब्रह्मचारीं भुत्वा ततः कृतदारो गृहस्थाश्रम प्रविश्य पञ्चमहायज्ञाननुष्ठाय पञ्चाशदूर्षे वयसि वानप्रस्थो भवेत् । तदनन्तरं च सर्वं सांसारिकं वस्तु परित्यज्यनिरासक्तो मोक्षमिच्छन् मृत्युमेव प्रतीक्ष्य तिष्ठेत्। किन्तु मोक्षेच्छातः प्राक् त्रीणि ऋणान्यवश्यम-पाकरणीयानि भवेयुः। अन्यथा नरकगमनं ध्रुवमेव। प्रसङ्गेऽस्मिन्नुक्तं मनुना यत् ।

**ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।**
**अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ।**
**अधीत्य विधिवद् वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।**
**इष्ट्वाच शक्तितो यज्ञैः मनो मोक्षे निवेशयेत् ।।**[१४] इति ।।

**वर्णाश्रमधर्मः -**

वर्णविशेषेण सह यत्राश्रमविशेषस्य सम्बन्धः स वणाश्रमधर्मं इत्युच्यते। यथा - ब्रह्मणब्रह्मचारिणो विल्वो वा पालाशे वा दण्डः, तथा क्षत्रियब्रह्म-चारिणो वाटो वा खादिरो वा दण्डः, वैश्यब्रह्म-चारिणश्च पैलव उदुम्बरौ वा दण्डः इति। एतेन एकस्मिन्नाश्रमेऽनि वर्णभेदेन धर्मभेदः परिकलपतः। अयमेव धर्मः वर्णाश्रमधर्मपदेन व्यपदिश्यते । एतेन ज्ञायते यदेकस्मिन्नाश्रमे विद्यामाना अपि जना यान् विविधान् धर्मान् पालयन्ति ते वर्णाश्रमधर्मा इति कथ्यन्ते ।

**गुणधर्मः -**

धर्मशास्त्रे राज्ञः सन्धिविग्रहादयो गुणाः प्रतिपादिताः । तेषां विषये मनुनोक्तं यत्-

**सन्धिश्च विग्रहश्चैव यानमासनमेव च ।**
**द्वेधीभावं संश्रयश्च षड्गुणांश्चिन्तयेत्सदा ।।**[१५] इति ।।

एतैः सन्धिविग्रहादिगुणैरभिषिक्तः क्षत्रियविशेषः एव राजपदेना-धिष्ठितो भवति । अतो गुणधर्मो राजधर्म एव इत्यत्र नास्ति कापि विचिकित्सा । एतेन प्रजारक्षणार्थं प्रातरारभ्य शयनं यावत् राज्ञा क्रियमाणः कर्मविशेषः राजधर्मापरपर्य्यायो गुणधर्म इत्युच्यते ।

**निमित्तधर्मः-**

धर्ममनाचरन् निन्दितं निषिद्धं च कर्म कुर्वन्नरः पापभाक् भवति। तच्च पापनेकविधम् मन्वादिमहर्षिभिः पापानि निरूपितानि तानि यथा-अतिपातकं, महापातकं, अनिपातकं, उपपातकं, संकरीकरणं, अपत्रीकरणं, मलिनीकरणं, प्रकीर्णकमिति। एतदर्थं पापी स्वपापा-नुसारं प्रायश्चित्तं कुर्यादिव। पापतारतम्येन प्रायश्चित्त-तारम्यमपि कल्पितम्। अतोः यदा नामव इन्द्रियाशक्ते भूत्वाऽधर्ममाचरन् पापसत्तामात्मन्युत्पादयति तदा स्वात्मशुद्ध्यर्थं लोके संव्यवहारार्थं च प्रायश्चित्तमवश्यं कुर्यात्। विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम्। उक्तं च मनुना-

**अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।**
**प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ।।**[१६]

मानवो वेदविहितकर्मणोननुष्ठानादिन्द्रियाणामनिग्रहाच्च पतनयोग्यो भवति, येन तद्विशुध्यर्थं प्रायश्चित्तमपेक्ष्यते। मानवो यदा पापमा-चरति तत्क्षयार्थं स प्रायश्चित्तमवश्यं कुर्यात्, अन्यथाऽसौ लोकसंव्य-वहाय्र्यो न भवति। अतः प्रायश्चित्तस्य लक्षणं याज्ञवल्क्येन प्रतिपादितं यत् -

**विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।**
**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ।।**
**तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये ।**
**एवम्यान्तरात्मा च लोकश्चैव प्रसीदति ।। इति ।।**[१७]

एतानि पापानि यद्यज्ञानतः क्रियन्ते, तर्हि तानि क्षीयन्ते, ज्ञानतः कामतश्च कृतानां पापानां क्षयो न भवति । परन्तु लोकसंव्यवहारार्थं प्रायश्चित्तं करणीयमेवेति शास्त्रं प्रतिपादयति। अतः पापस्य गुरुत्वलघुत्वादिविचार-दष्ट्या प्रायश्चित्तानि कल्प्यन्ते।

निमित्तकोऽयं प्रायश्चित्ताधिकारः। इदं च प्रायश्चित्तं पापनिमित्तये अर्थात् पापशोधनार्यं पापं निमित्तीकृत्य विधानात् नैमित्तकम्। अयं प्रायश्चितशब्दः पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः। इदं प्रायश्चित्तं निमित्तधर्मेऽन्तर्भवति। बृहस्पतिवचनानुसारं प्रायश्चितं यत् क्रियते तत्रैमित्तिकमुच्यते इति मनुष्यः पापं निमित्तीकृत्य प्रायश्चित्त-माचरेदिति सर्वे शास्त्रकाराः स्वीकुर्वन्ति। प्रायश्चित्तशब्दस्यार्थ-ज्ञापनाय अङ्गिरसा लिखित्तमस्ति यत्-

**प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।**
**तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ।।**[१८]

पुनः केषाञ्चनविचारकाणां मतेन प्रायः शब्दः पापाजातकः। चित्तात्तिशब्दस्य शोधनमितित्तार्थो भवति। तस्मात् पापस्य शोधनमर्थात् शुद्धिकरणमेव प्रायश्चित्तम्। यथोक्तं चतुर्वर्गचिन्तामणौ- प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनम् । इति ।हेमाद्रिमते यथा- प्रायो विनाशो चित्तं साधनम् । विनष्टस्य साधनमिति विभागयोगेन प्रायश्चित्तशब्दः पापक्षयार्थे नैमित्तिके कर्मविशेषे वर्त्तते।

प्रायश्चत्तानि बहुधा पापशोधकानि भवन्ति। यथा क्वचित् जपद्वारा, तपसा, होमेन, तीर्थाटनेन, दानेन, उपवासेन चापि पापानि द्वरीकर्त्तुं शक्यन्ते। पृथक् पृथकभावेन पापानां गुरुत्वदृष्ट्या प्रायश्चित्तानुष्ठानेन पापानि अपाकर्त्तुं शक्यन्ते। प्रायश्चित्तं करणीयं वा न यदि प्रायश्चित्तेन पापक्षयो न भवति। पुनश्चैकेषां मतेन प्रायश्चित्तं करणीयमेव। यदि प्रायश्चित्तं तर्हि नरः कानिचित् पापानि ज्ञात्वैव करोति। कानिचिदपि कामनया सेवते। यथा मांसभक्षणे इच्छा जायते इति हेतोः कामतः पशुं

हन्ति। कामकृते कार्ये पापस्य ज्ञानं न भवेत्। परन्तु ज्ञानकृते पापे कामना भवत्येव। एतेभ्यै पापेभ्यो मुक्तिर्भवति न वा इत्यस्मिन् विषये मनुनोक्तं यत्-

**अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।**
**कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्॥**[१९]

एतस्मात् ज्ञायते अकामकृतपापास्य प्रायश्चित्तमस्ति। येन पापाक्षयो भवति। न पुनः कामतः कृते पापे यथोक्तं कामतो ब्रह्मणवधे निष्कृतिर्न विधीयते। यदेव स्यालर्हि काम-कृतपापस्य प्रायश्चित्तकरणस्य काऽऽवश्यकता. अत्रेदमुत्तरं यत् यद्यपि पापक्षयो न भवति तथापि लोकसंव्यवहारार्थं प्रायश्चित्त करणीयम्। यथोक्तं याज्ञवल्क्येन [२०]-
कामतो व्यवहार्यस्तु वचनादिह जायते।

एतस्मात् ज्ञायते यत् समाजे आत्मनः शुद्धताज्ञापनाय सुशृंखलितसामाजिकव्यवस्था- स्यापनाय च प्रायश्चित्तस्यावश्यकता वर्त्तते। यद्यपि अस्मिन् जन्मनि मनुष्यः प्रायश्चित्तस्य फलभाक् न भवति। परन्तु फलं तस्य परस्मिन् जन्मनि एव लभ्यते। अयश्च निमित्तधर्म इत्यभिधीयते।

**साधारणधर्मः -**

साधारणधर्मः अहिंसादिः। न हिंस्यात्सर्वा भूतानि इत्याचाण्डालं साधारणो धर्मः। अर्थात् - यो धर्म आचाण्डालाद् ब्रह्मणं यावत् सर्वैरनुष्ठीयतेऽसौ साधारणधर्म इति कथ्यते। अयं धर्मः न केवलं वर्णविशेषस्यापि तु वर्णाश्रमनिर्विशेषेण सर्वैः परिपाल्यते इति हेतोः धर्मोऽयं साधारणधर्म इति पदेन व्यपदिश्यते। ते च धर्मा के इत्याकाङ्क्षायां विष्णपुराणे [२१] पठ्यते -

**क्षमा सत्यं दमः शौचं दानमिन्द्रिसंयमः।**
**अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया।**
**आर्जवं लोभशून्यत्वं देवब्रह्मणपूजनम्।**
**अनभयोऽसूया च धर्मः सामान्य उच्यते॥**

मनुनाऽपि प्रतिपादितं यत् -

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[२२] इति ॥

एवं संक्षेपेण षड्विधाः स्मार्त्तधर्मा विज्ञानेश्वरेण प्रतिपादिताः। एतान् विहाय अहिंसा परमो धर्म इति नानामुनिभिः प्रतिपादितम् । षट्स्मार्तधर्मेषु प्रायश्चित्तस्य योगदानम्

भारतीयधर्मपरम्परायामतिप्राचीनशास्त्राणां मूलभूतो भवति वेदः। यतो हि वेदात् प्राक् किमपि साहित्यं नोपलब्धमासीत् तदनन्तरं धरमशास्त्रस्योद्भवो जातः इति प्रामाणिकैः स्वीक्रियते। मानवजीवननस्य सुपरिचालनार्थ यस्यैव धर्मोपदेशस्यावशआयकता वर्तते तत्सर्वं धर्मशास्त्रेषूपलभ्यते। तस्यैव धर्मस्य मानवोचितकर्मणा सह निविडसम्बन्धो वर्तते। एतदेव विषयमाधारीकृत्य धर्मशास्त्रकारैः धर्मस्यानेके भेदाः प्रतिपादिताः। प्रथमतः धर्मस्य भेदद्वयं दृश्यते। यथा - श्रौतधर्मः, स्मार्तधर्मश्चेति। तद्वविषये मत्स्यपुराणे उाल्लिखितमस्ति यत्-

**दाराग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम्।** [२३]

पुनस्तत्र

**स्मात्र्तो वर्णाश्रमाचारी यमैश्च नियमैर्युतः॥** [२४]

श्रौतधर्मस्य लक्षणं भवति अग्निप्रतिष्ठा, पौर्णमासी, अमावास्या, यज्ञः, सोमकृत्यानां वर्णनं चेति। तद्वदेव स्मार्त्तधर्मे वर्णाश्रमव्यवस्था, यमनियमविषये वर्णनम्, प्रायश्चित्तव्यवस्था चेति दृशआयते। मनुनाऽपि प्रवृत्तिनिवृत्तिभेदेन धर्मस्य द्वैविध्यं प्रतिपादितम्।[२५] वराहपुरताणानुसारं धर्मसाधारणविशेषश्च रूपेण आदृताः सन्ति।[२६] महाभारतानुसारं धर्मस्त्रिधा विभज्यते यथा- वेदप्रतिपादितः, स्मृतिप्रतिपादितः, शिष्टजनानां शीष्टाचारश्चेति। विज्ञानेश्वरेण मिताक्षराटीकायां धर्मशब्देन षट्स्मार्त्तधर्माणां व्याख्या कृता।[२७] षड्विधेषु स्मार्त्तधर्मेषु निमित्तधर्मोऽन्यतमः। तत्र चोच्यते विहिताकरणप्रतिषिद्ध सेवननिमित्तं प्रायश्चित्तम्।[२८] अर्थात् विहितानि यानि कर्माणि सिन्त तेषां करणे अविहितानां कर्मणां करणे विहितानां कर्मणां चाकरणे नरः पत्तनमृच्छगति तेन पापं भवतीति शास्त्रकाराणामभिमतम्। पापात् तस्मात् विमोक्तुं प्रायश्चित्तीयते नरः। अतः प्रायश्चित्तस्यास्य षट्स्मार्त्तधर्मेषु अस्त्येव महद्योगदानमिति नास्ति कश्चिद्विसम्बादः। तत्र भगवता मनुना[२९] प्रतिपादितं यत्-

**अकुर्वन्विहितं कर्म नन्दितं च समाचरन्।**
**प्रसक्तश्चेनिद्यार्थेषु प्रायश्चित्तीयते नरः॥** इति

दैनन्दिनजीवने कर्मकुर्वतां मनुष्याणां विविधेषु क्षेत्रेषु पापं भवति। पापनाशत्वेन प्रायश्चित्तस्य प्राधान्यत्वात् त एव जनाः पापापनोदाय प्रायश्चित्तमेवाङ्गीकुर्वन्ति। अतो पापनाशनमेव प्रायश्चित्तस्य मूलमन्त्रः। यद्यपि आचार-व्यवहार-प्रायश्चित्तभेदेन मुख्यरूपेण धर्मशास्त्रस्य विभागाः सन्ति तथापि शास्त्रस्यास्य सांगोपाङ्गवर्णनायै वर्ण -आश्रम -वर्णाश्रम -गुण -साधारण- निमित्तरूपेण धर्मः षड्धा विभक्तः।स्मृतिशास्त्रेषु प्रतिपादितत्वात् एते धर्माः स्मार्त्तधर्मत्वेनाभिधीयन्ते। तत्र च याज्ञवल्क्यस्मृतौ मिताक्षराकारेण विज्ञानेश्वरेण एतेषां धर्माणां अत्र च धर्मशब्दः षड्विधःस्मात्त७धर्मविषयः, तद्यथा- वर्नधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः,गुणधर्मः,निमित्तधर्मः, साधारनधर्मशआचेति रूपेन प्रतिपादितः। तत्र निमित्ताख्यो यो स्मार्त्तधर्मः स च विहिताकरणप्रति-षिद्धसेवनमभिलक्ष्य एवानुद्यते तर्हि वचनादस्माद्विज्ञायते यत् पापं यथा कादाचित्कत्वेन भवति तथैव तसय प्रायश्चित्तमवश्यमेव कर्त्तव्यम्। किं नाम प्रायश्चित्तमिति जिज्ञासायां मनुस्मृतौ[३०] उच्यते यत्-

**प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।**
**तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्।**।इति।

ब्रह्मचर्यादिष्वाश्रमेषु स्थित्वा यथावत् गृहस्थाश्रमं परिपाल्य मनो मोक्षे निवेशयेदिति धर्मशास्त्रकारानामाशयः। सामग्रिकरूपेण धर्मशास्त्रे वर्णिताः ये विषयाः सन्ति तेषु अस्ति यद्यपि आचारव्यवहारयोः महद्योगदानं तथापि पापनाशकत्वेनसमाजे संव्यवहारार्थं च क्रियमाणानां पापाना-मपनोदाय प्रायश्चित्तं नितरामेवापेक्षते। यद्यपि प्रायश्चित्तेन पापक्षयो भवति नवेति शंका परिकल्पिता वर्तते तथापि षट्स्मार्त्तधर्मेषु प्रायश्चित्तस्य तदङ्गभूतानां होम-याग-तपः-स्वाध्यायादीनामस्त्येव महद्योगदान-मिति मन्वादीनां धर्मशास्त्राकाराणामभिमतम्।

**आकरग्रन्थाः –**

१.मनुस्मृतिः (मेधातिथिभाष्यसहिता) - एसियाटिक सोसाइटि आफ वेङ्गल, कलिकता, १९३९।

२.याज्ञवल्क्यस्मृतिः(समिताक्षरा) चौखम्बासंस्कृतसीरिज, वाराणसी- १९६८

३. धर्मशास्त्र का इतिहास , सं.अर्जुन चौवे काश्यप, उत्तरप्रदेश हिन्दी संस्थान, लखनउ,१९८० ।

४.अष्टादशस्मृतिः - सम्पादकः, प.मिहिरचन्द्र, नागप्रकाशक, जवाहरनगर, दिल्ली।

५.धर्मशास्त्र का इतिहास, डा.पी.वी, काणे, अनुवादः-अर्जुनचौवे-काश्यप,उ.प्र.हिन्दीसंस्थानम्, लखनऊ- १९६१

६.धर्मशास्त्रशब्दकोशः, पं.कुलमणिमिश्रशर्मा, ओडिशाराज्यपर्यटन-क्रीडा-संस्कृतिनिर्देशालय, भुवनेश्वरम्,१९८१

७.धर्मशास्त्रस्येतिहास, प्रो.जयकृष्णमिश्रः, चौखम्बासंस्कृत सीरीज अफिस, वाराणसी, २०१०

८.धर्मसिन्धुः, श्रीकाशीनाथ उपाध्यायः, चौखम्बासंस्कृतसीरिज, वाराणसी,१९६८

**उद्धृतपाठसूची**

१.म.स्मृ.१२.८८-८९
२.म.स्मृ.२.२५
३.म.स्मृ.२.१
४.म.स्मृ.२.२५.मन्वर्थ.४२
५.अस्य मन्त्रस्य विशिष्टार्थः धर्मशास्त्रशब्दकोषस्य प्रथमखण्डे भूमिकायां प्रकाशितः । पृ.१८.
६म.स्मृ.१.८७
७.या.स्मृ.मिता. १/१
८.म.स्मृ., १-८८
९.म.स्मृ., १-८९
१०.म.स्मृ., १-९०
११.म.स्मृ., १-९१
१२.या.स्मृ., ३-३५
१३.या.स्मृ., ३/३५-३८
१४.म.स्मृ., ६/३५-३६
१५.म.स्मृ., ७/१६०
१६.म.स्मृ.११.४४
१७. या.स्मृ.
१८.उ.आ..स्मृ.४.१
१९.म.स्मृ.११.४५
२०.या.स्मृ.३.२२६
२१.धर्म.द्रु.पृ१११
२२.म.स्मृ., ६-९२
२३.म०पु०४४.३०
२४.म०पु०४४.३२
२५.म०स्मृ०१२.८८
२६.ध.द्रु.पृ.११०
२७.या०स्मृ०१.१मिता०पृ.१
२८.या०स्मृ०मिता०१.१
२९.म०स्मृ०११.४४
३०.म०स्मृ०११.५